श्री राघवाष्टकं

श्री राघवाष्टकं

राघवं करुणाकरं मुनिसेवितं सुरवंदितं
जानकीवदनारविंददिवाकरं गुणभाजनं |
वालिसूनुहितैषिणं हनुमत्प्रियं कमलेक्षणं
यातुधानभयंकरं प्रणमामि राघवकुंजरं || 1 ||

मैथिलीकुचभूषणामल नीलमौक्तिकमीश्वरं
रावणानुजपालनं रघुपुंगवं मम दैवतं |
नागरीवनितानानांबुजबोधनीयकलेवरं
सूर्यवंशविवर्धनं प्रणमामि राघवकुंजरं || 2 ||

हेमकुंडलमंडितामलकंठदेशमरिंदमं
शातकुंभ मयूरनेत्रविभूषणेन विभूषितं |
चारुनूपुरहारकौस्तुभकर्णभूषणभूषितं
भानुवंशविवर्धनं प्रणमामि राघवकुंजरं || 3 ||

दंडकाख्यवने रतामरसिद्धयोगिगणाश्रयं
शिष्टपालनतत्परं धृतिशालिपार्थकृतस्तुतिं |
कुंभकर्णभुजाभुजंगविकर्तने सुविशारदं
लक्ष्मणानुजवत्सलं प्रणमामि राघवकुंजरं || 4 ||

केतकीकरवीरजातिसुगंधिमाल्यसुशोभितं
श्रीधरं मिथिलात्मजाकुचकुंकुमारुणवक्षसं |
देवदेवमशेषभूतमनोहरं जगतां पतिं
दासभूतभयापहं प्रणमामि राघवकुंजरं || 5 ||

यागदानसमाधिहोमजपादिकर्मकरैर्द्विजैः
वेदपारगतैरहर्निशमादरेण सुपूजितं |
ताटकावधहेतुमंगदतातवालिनिषूदनं
पैतृकोदितपालकं प्रणमामि राघवकुंजरं || 6 ||

लीलया खरदूषणादिनिशाचराशुविनाशनं
रावणांतकमच्युतं हरियूथकोटिगणाश्रयं |
नीरजाननमंबुजांघ्रियुगं हरिं भुवनाश्रयं
देवकार्यविचक्षणं प्रणमामि राघवकुंजरं || 7 ||

कौशिकेन सुशिक्षितास्त्रकलापमायतलोचनं
चारुहासमनाथबंधुमशेषलोकनिवासिनं |
वासवादिसुरारिरावणशासनं च परांगतिं
नीलमेघनिभाकृतिं प्रणमामि राघवकुंजरं || 8 ||

राघवाष्टकमिष्टसिद्धिदमच्युताश्रयसाधकं
मुक्तिभुक्तिफलप्रदं धनधान्यसिद्धिविवर्धनं |
रामचंद्रकृपाकटाक्षदमादरेण सदा जपेत्
रामचंद्रपदांबुजद्वय संततार्पितमानसः || 9 ||

राम राम नमोऽस्तु ते जय रामभद्र नमोऽस्तु ते
रामचंद्र नमोऽस्तु ते जय राघवाय नमोऽस्तु ते |
देवदेव नमोऽस्तु ते जय देवराज नमोऽस्तु ते
वासुदेव नमोऽस्तु ते जय वीरराज नमोऽस्तु ते || 10 ||

इति श्री राघवाष्टकं |